ऊर्द्धं संयोजयेन्नाभौ अस्योपरि तथाञ्जलिः ।
योगमुद्रा समाख्याता योगिनां तत्त्वदायिनी ॥
सर्व्वेषामपि देवानां पूजने चिन्तने तथा ।
योगमुद्रा समाख्याता तुष्टिप्रीतिकरी सदा ॥४९॥
प्राञ्जलिर्नाम मुद्रा तु उर्द्धाधोभावयोजिताम् ।
त्रिभिद्य दर्शयेद्धस्तौ उर्द्धाधः प्रसृतीकृतौ ॥
भेरमुद्रा समाख्याता मम विष्णोर्विधेः प्रिया ॥५०॥
अङ्गुष्ठे द्वे तु निःक्षिप्य करयोरुभयोस्तले ॥
अग्रेण योजयेत् पश्चात् कनिष्ठायुगलं ततः ।
उभयोर्हस्तयोश्चाभ्यास्तर्ज्जन्याद्याश्च योजयेत् ॥
अग्राग्रैस्तु पृथक्कृत्य दर्शयेत्तत् कनिष्ठिकाम् ।
मुद्रा सम्मोहनं नाम कामदुर्गारमाप्रिया ॥
सर्व्वेषामपि देवानां मोहनं प्रीतिदं स्मृतम् ॥५१॥
आनम्य सव्यहस्तस्य मध्यमानामिके तथा ॥
तयोः पृष्ठे तु संयोज्य अङ्गुष्ठाग्रं ततः परम् ।
कनिष्ठां तर्ज्जनीश्चैव अग्रेण योजयेत्ततः ॥
बाणमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ॥५२॥
सर्व्वाङ्गुलीस्तु सङ्कोच्य अङ्गुष्ठमथ तर्ज्जनीम् ॥
प्रसार्य्य करयोः पश्चादङ्गुष्ठाग्रन्तु योजयेत् ।
अङ्गुष्ठाग्रेण तर्ज्जन्या अग्रेणापि च तर्ज्जनीम् ॥
यथाशक्ति प्रसार्य्यापि धनुर्मुद्रा प्रकीर्त्तिता ॥५३॥
सर्व्वाङ्गुलीनामग्राणि आस्यातीर्थे नियोजयेत् ॥
अनामिकायाः पृष्ठे तु अङ्गुष्ठाग्रं नियोजयेत् ।
शून्यं तूणीरवत् कृत्वा तेषामन्तस्तु भैरव ! ।
तूणीरमुद्रा चाख्याता सर्व्वेषां प्रीतिवर्द्धिनी ॥५४॥
मुद्रासु संस्थिता पूजा मुद्रासु परिचिन्तनम् ।
मुद्रासु संस्थिता योगा मुद्रा मोदकरास्ततः ॥
यदा यदा पूजनेषु चिन्तने ध्यानकर्म्मणि ।
यज्ञादौ स्तवने वापि हस्तकृत्यं न विद्यते ।
तदा मुद्रायुतं कुर्य्यादिष्टापूर्त्ते करद्वयम् ।
यज्ञकृत्येषु चेच्छक्तो हस्तो मुद्रासु च क्षमः ।
तदा मुद्रां विधायैव तत्तु कृत्यं समाचरेत् ॥
मुद्रावियुक्तहस्तन्तु क्रियते कर्म्मदैविकम् ।
कृत्वा तन्निष्फलं यस्मात्तस्मान्मुद्रान्वितो भवेत् ॥
विसर्जने तु देवानां यस्य या परिकीर्त्तिता ।
मुद्रा तां पूजनादौ तु तस्य नैव प्रयोजयेत् ॥
विसृष्टेऽतीत्य मुद्रां मुद्रायुक्तः समाचरेत् ।
पूजनादि समस्तञ्च कर्म्म वृद्धो विचक्षणः ॥
ततो मुद्रा परं धाम मुद्रा पुण्यप्रदायिनी ।
देवानां मोददा मुद्रा तस्मात्तां यत्नतश्चरेत् ॥
अर्द्धयोनिर्म्महायोनिर्योनिर्मुण्डी च वैष्णवी ।
मुद्रा विसर्ज्जने प्रोक्ता शिवात्रिपुरयोः सदा ॥
दुर्गायाः सर्व्वरूपेषु मुद्रा एताः प्रकीर्त्तिताः ।
योनिश्च सम्पुटश्चैव महायोनिस्तथैव च ॥
वर्ज्जयित्वा यस्तभावादुक्तादन्यत्र योजयेत् ।
भवेयुस्त्रिपञ्चाशदन्या मुद्राः समन्ततः ॥
ता यस्तभावादामाः स्युर्मुद्रा मोदकराः पराः ।
एवं वां कथिता मुद्राः पूजने पूज्यतुष्टिदाः ॥”

इति कालिकापुराणे ६५ अध्यायः ॥

मुद्राङ्कितः, त्रि, (मुद्रया अङ्कितः ।) मुद्रया चिह्नितः । छापाकरा मोहरकरा इत्यादि भाषा । यथा,—

“धाता विश्वविसृष्टिमात्रनिरतो देवोऽपि गौरी-
मुखा-
श्लेषानन्दविघूर्णमाननयनो दक्षाध्वरध्वंसकृत् ।
दैत्यारिः कमलाकपोलमकरीमुद्राङ्कितोरःस्थलः
चेतोऽन्याविततेषु जन्तुषु पुनः का नाम शान्तेः
कथा ॥”

इति प्रबोधचन्द्रोदयनाटके १ अङ्कः ॥

मुद्रालिपिः, स्त्री, (मुद्रया लिपिः ।) पञ्चधा-लिप्यन्तर्गतलिपिविशेषः । छापार अक्षर इति भाषा । यथा,—

“मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा ।
गुण्डिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्व्याप्ता धरित्री शुभदा हर ! ॥”

इति वाराहीतन्त्रम् ॥

अस्याः पाठ्यत्वं धार्य्यत्वञ्च यथा,—

“लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् ।
शिल्पादिनिर्म्मितं यच्च पाठ्यं धार्य्यञ्च सर्व्वदा ॥”

इति खड्गमालातन्त्रम् ॥

मुद्रिका, स्त्री, (मुद्रा स्वार्थे कन् + स्त्रियां टाप् । पूर्व्वाकारस्य ह्रस्वत्वम् । अत इत्वं च ।) स्वर्ण-रूप्यादिनिर्म्मितमुद्रा । मोहर टाका इत्यादि भाषा । यथा,—

“सौवर्णीं राजतीं ताम्रीमायसीं वा सुशो-
भिताम् ।
सलिलेन सहस्तेनां प्रक्षिपेत् तत्र मुद्रिकाम् ॥”

इति मिताक्षरायां व्यवहाराध्यायः ॥

मुद्रितं, त्रि, (मुद्रा मुद्रणं अस्य जातेति । मुद्रा इतच् ।) अप्रफुल्लम् । मोदा इति भाषा । तत्पर्य्यायः । सङ्कुचितम् २ निद्राणं ३ मीलितम् ४ । इति हेमचन्द्रः ॥ मुद्राङ्कितञ्च ॥ (परित्यक्तम् । यथा, नैषधचरिते । ५ । १९ ।

“मुद्रितान्यजनसंकथनः सन्
नारदं बलिरिपुः समवादीत् ।”

“मुद्रितं परित्यक्तम् ।” इति तट्टीका ॥)

मुधा, व्य, (मुह्यतीति । मुह् + बाहुलकात् का । पृषोदरादित्वात् हस्य धः ।) व्यर्थकम् । इत्यमरः ।३।४।४। (यथा, महाभारते ।१४।३७।४।

“मुधा ज्ञानं मुधा दत्तं मुधा सेवा मुधा श्रमः ।
एवं यो युक्तधर्म्मः स्यात् सोऽमृतत्वमश्नुते ॥”)

मुनिः, पुं, मनुते जानाति यः । (इति मन् + “मनेरुच ।” उणा० ४ । १२२ । इति इन् + अत उच ।) मौनव्रती । इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । वाचंयमः २ । इत्यमरः ।२।७।४२। मौनी ३ व्रती ४ ऋषिः ५ शापाख्यः ६ सत्यवाक् ७ । इति जटाधरः ॥ (यथा, नैषधे ।१।१३३।

“फलेन मूलेन च वारिभूरुहां
मुनेरिवेत्थं मम यस्य वृत्तयः ॥”)

तस्य लक्षणं यथा,—

“दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥”

इति श्रीभगवद्गीता ॥*॥

तस्य धर्म्मो यथा,—

ब्रह्मोवाच ।

“मुनिभिश्चरिता धर्म्मा उक्ता व्यास ! मया तव ।
यैर्विष्णुस्तुष्यते देवः सुखादिपरिभाविकः ॥
तर्पणेन च होमेन सन्ध्यया वन्दनेन च ।
प्राप्यते भगवान् विष्णुर्धर्म्मकामार्थमोक्षदः ॥
धर्म्मो विष्णुर्मतो विष्णुः पूजा विष्णुस्तु तर्पणम् ।
होमः सन्ध्या तथा ध्यानं धारणा सकलं
हरिः ॥”

इति गारुडे २२६ अध्यायः ॥*॥

तस्याश्रमे वर्णनीयानि यथा । अतिथिपूजा १ हरिणविश्वासः २ हिंस्रजन्तुशान्तता ३ यज्ञ-धूमः ४ मुनिसुतः ५ द्रुमसेकः ६ वल्कलः ७ वृक्षस्य ८ । इति कविकल्पलता ॥*॥ मुनिविशेषाणां ब्रह्मणोऽङ्गविशेषादुत्पत्तिर्यथा,—

“पुलस्त्यो दक्षकर्णाच्च पुलहो वामकर्णतः ।
दक्षनेत्रात्तथात्रिश्च वामनेत्रात् क्रतुः स्वयम् ॥
अरणिर्नासिकारन्ध्रात् अङ्गिराश्च मुखाद्रुचिः ।
भृगुश्च वामपार्श्वाच्च दक्षो दक्षिणपार्श्वतः ॥
छायायाः कर्द्दमो जातो नाभेः पञ्चशिखस्तथा ।
वक्षसश्चैव वोढुश्च कण्ठदेशाच्च नारदः ॥
मरीचिः स्कन्धदेशाच्च अपस्तम्बस्तथा गलात् ।
वशिष्ठो रसनादेशात् प्रचेता अधरोष्ठतः ॥
हंसश्च वामकुक्षेश्च दक्षकुक्षेर्यतिः स्वयम् ।
सृष्टिं विधातुञ्च विधिश्चकाराज्ञां सुतानपि ॥”

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे ८ अध्यायः ॥*॥

गयासुरशरीरे यज्ञार्थं ब्रह्मणो मानसात् सृष्टा मुनयो यथा,—

“ब्रह्मा सम्भृतसम्भारो मानसानृत्विजोऽसृजत् ।
अग्निशर्म्माणमस्तत् शौनकं जाजलिं रुचिम् ॥
कुसुखिं वेदकौण्डिन्यं हारीतं काश्यपं कृपम् ।
गर्गं कौशिकवाशिष्ठौ मुनिं भार्गवमव्ययम् ॥
वृद्धं पाराशरं कण्वं माण्डव्यं श्रुतिकेवलम् ।
श्वेतं सुतालं दमनं सुहोत्रं कङ्कमेव च ॥
लौगाक्षिञ्च महाबाहुं जैगीषव्यं तथैव च ।
दधिपञ्चमुखं विप्र ! ऋषभं कर्कमेव च ॥
कात्यायनं गोभिलञ्च मुनिमुख्यं महाव्रतम् ।
जटामालिनमव्ययं चाट्टहासञ्च दारुणम् ॥
आत्रेयञ्चाप्यङ्गिरसमौपमन्युं महाव्रतम् ॥
गोकर्णञ्च गुहावासं शिखण्डिनमुमाव्रतम् ॥
सुपालकं गौतमञ्च तथा वेदशिरो व्रतम् ।
एतानन्यांश्च विप्रेन्द्रान् ब्रह्मा लोकपितामहः ।
परिकल्प्याकरोद्यागं गयासुरशरीरके ॥”

इति वायुपुराणे गयामाहात्म्यम् ॥*॥

मुनिविशेषनाम्नां व्युत्पत्तिर्यथा,—

“कतिकल्पान्तरेऽतीते ऋतुः सृष्टिविधौ पुनः ।
मरीचिमिश्रैर्मुनिभिः सार्द्धं कण्ठाद्बभूव सः ॥
विधेर्नरदनाम्नश्च कण्ठदेशाद्बभूव सः ।
नारदश्चेति विख्यातो मुनीन्द्रस्तेन हेतुना ॥
यः पुत्त्रश्चेतसो धातुर्ब्बभूव मुनिपुङ्गवः ।
तेन प्रचेता इति तन्नाम चक्रे पितामहः ॥
बभूव धातुर्यः पुत्त्रः सहसा दक्षपार्श्वतः ।
सर्व्वकर्म्मणि दक्षश्च तेन दक्षः प्रकीर्त्तितः ॥